षम् ।) कशाघातयोग्यः । कोड़ा मारिवार उपयुक्त इति भाषा । तत्पर्य्यायः । कश्यः २ । इत्यमरः । ३ । १ । ४४ ॥

कशिपुः, पुं, (कशति दुःखं कश्यते वा कशगति-शासनयोः । कश + सृगृभ्यादित्वात् निपातनात् साधुः ।) भक्तम् । आच्छादनम् । एकोक्त्यान्नवस्त्रे कशिपू इति द्विवचनान्तम् । इति मेदिनी ॥ (शय्या । यथा, भागवते २ । २ । ४ ।
"सत्यां क्षितौ किं कशिपोः प्रयासैः" ॥)

कशेरु, स्त्री पुं, (के देहे शीर्य्यते । क + शॄ + "केश्र एरु च चास्य" । उणां १ । ९० । इति उः एरुङ्-चान्तादेशः ।) एकास्थि । पिठेर दाँड़ा इति भाषा । इति हलायुधः ॥ (पुंसि उदाहरणं ।
"किं कुर्व्वता वराहेण खाद्यन्ते हि कशेरवः" ।
इत्युद्भटिकाष्टतचन्द्रवचनम् ।)

कशेरु, स्त्री, (कं जलं वातं वा शृणाति । क + शॄ + उणादित्वात् उः । एरुङ्चान्तादेशः ।) कशेरुका । केशुर इति भाषा । इति रत्नमाला ॥ राजनिर्घण्टे दन्त्यसकारवान् पुंलिङ्गोऽप्ययं शब्दः ॥ ("कशेरु द्विविधं तत्तु महद्राजकशेरुकम् ।
मुस्ताकृतिलघुः स्यात् यत् तच्चिवोटमिति स्मृतम्" ॥
इति वैद्यकम् ॥)

कशेरुः, पुं, (क + शॄ + उ + एरुङ् ।) जम्बुद्वीपस्य खण्डविशेषः । इति शब्दमाला ॥

कशेरुकं, स्त्री, (कशेरु + स्वार्थे कन् ।) तृणकन्दः । केशुर इति भाषा । अस्य गुणाः । गुरुत्वम् । विष्टम्भकारित्वम् । शीतलत्वञ्च । इति राजवल्लभः ॥
("तरुटविसशालूकक्रौञ्चादनकशेरुकम् ।
शृङ्गाटकं कलोड्यञ्च गुरु विष्टम्भि शीतलम्" ॥
इति चरके सूत्रस्थाने २७ अध्याये ॥)

कशेरुका, स्त्री, (कशेरु + स्वार्थे कन् टाप् च ।) एकास्थि । इति रत्नमाला । पिठेर दाँड़ा इति भाषा ।

कशेरूः, स्त्री, (क + शॄ + "केश्र एरुङ्चास्य" । उणां १ । ९० । इति ऊः । एरुङ्चान्तादेशः ।) तृणकन्दः इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ केशुर इति भाषा ।

कश्चन, व्य, (किम् + चन् इति मुग्धबोधमतम् । पाणिनिमते पृथक्पदमिति भेदः ।) कश्चित् । इति व्याकरणम् ॥ कोन । केह इति च भाषा । (यथा माघः १६ । १ ।
"दमघोषसुतेन कश्चन
प्रतिशिष्टः प्रतिभानवानघ" ॥)

कश्चित्, व्य (किम् + चित् । पाणिनिमते पृथक् पदम् ।) कश्चन । इति व्याकरणम् ॥ (यथा मेघदूते १ ।
'कश्चित्कान्ता विरहगुरुणा स्वाधिकारप्रमत्तः' ॥)

कश्मलं, क्ली, (कश गतिशासनयोः + कल । "कुटि-कशिकौतिभ्यः प्रत्ययस्य मुट्" ॥ उणां १ । १०८ इति मुट् ।) मूर्च्छा । इत्यमरः । २ । ८ । १०९ । (मोहः । यथा, गीतायाम् २ । २ ।
"कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्" ।)

पापम् । इति शब्दमाला ॥ मलिने त्रि । इति हेमचन्द्रः ॥

कश्मीरः, पुं, (कश् + "कशेर्मुट् च । उणां ४ । ३० इति ईरन् मुट् च ।) काश्मीरदेशः । इति त्रिकाण्डशेषः ॥ (अस्य सीमादि यथा,—शक्ति सङ्गमतन्त्रे ७ पटले ।
"शारदामठमारभ्य कुङ्कुमादितटान्तकः ।
तावत् कश्मीरदेशः स्यात् पञ्चाशद्योजनात्मकः" ॥)

कश्मीरजन्मा, [न्] पुं, (कश्मीरे कश्मीरदेशे जन्म यस्य ।) काश्मीरजन्मा । कुङ्कुमम् । इत्यमरटीकायां रायमुकुटः ॥

कश्यं, क्ली, (कशां अर्हतीति । कशा + दन्तादित्वात् । ५ । १ । ६६ । यत् ।) अश्वमध्यभागः । (कशति अनेन । कश + बाहुलकात् करणे यत् ।) मद्यम् । यथा,—मार्कण्डेयपुराणे १०४ । ३ ।
"ब्रह्मणस्तनयो योऽभूत् मरीचिरिति विश्रुतः ।
कश्यपस्तस्य पुत्त्रोऽभूत् कश्यपानात् स कश्यपः" ॥
कशार्हे त्रि । इत्यमरः । ३ । १ । ४४ ॥

कश्यपः, पुं, (कश्यं सोमरसादिजनितं मद्यं पिबतीति । कश्य + पा + क । अस्य नामनिरुक्तिर्यथा मार्कण्डेयपुराणे । १०४ । ३ ।
"ब्रह्मणस्तनयो योऽभूत् मरीचिरिति विश्रुतः ।
कश्यपस्तस्य पुत्त्रोऽभूत् कश्यपानात् स कश्यपः" ।)
मुनिभेदः । कलागर्भजो मरीचिमुनेरौरसः पुत्त्रः । अस्य भार्य्या दक्षस्य सप्तदशकन्याः । तासां तत्पुत्त्राणाञ्च नामानि यथा । अदितेर्देवाः १ दितेर्दैत्याः २ दनोर्दानवाः ३ काष्ठाया अश्वादयः ४ अरिष्टाया गन्धर्व्वाः ५ सुरसाया राक्षसाः ६ इलाया वृक्षाः ७ मुनेरप्सरोगणाः ८ क्रोधवशायाः सर्पाः ९ ताम्रायाः श्येनगृध्रादयः १० सुरभेर्गोमहिषाः ११ सरमायाः श्वापदाः १२ तिमेर्यादोगणाः १३ विनताया गरुड़ारुणौ १४ कद्रोर्नागाः १५ पतङ्ग्याः पतङ्गाः १६ यामिन्याः शलभाः १७ । इति श्रीभागवतम् ॥ * ॥ (मार्कण्डेयपुराणमते अस्य त्रयोदशभार्य्याः । यदुक्तं तत्रैव १०४ अध्याये । अदितिः १ दितिः २ दनुः ३ विनता ४ खसा ५ कद्रुः ६ मुनिः ७ क्रोधा ८ रिष्टा ९ इरा १० ताम्रा ११ इला १२ प्रधा १३ । महाभारतमतेऽपि अस्य त्रयोदश भार्य्याः । यदुक्तं तत्रैव १ । ६५ । ११—१३ ।
"मरीचेः कश्यपः पुत्त्रः कश्यपात्तु इमाः प्रजाः ।
प्रजज्ञिरे महाभागा दक्षकन्यास्त्रयोदश ॥
अदितिर्दितिर्दनुः काला दनायुः सिंहिका तथा ।
क्रोधा प्राधा च विश्वा च विनता कपिला मुनिः ।
कद्रुश्च मनुजव्याघ्र ! दक्षकन्यैव भारत" ! ॥
परमेश्वरस्यैव कश्यप इति नामास्ति । यथा,
"तेनैवेमाः सर्व्वाः प्रजा उत्पादितास्तस्मात् सर्व्वा इमाः प्रजाः काश्यप्य इत्युच्यन्ते । कश्यपः कस्मात् पश्यको भवतीति निरुक्त्या पश्यतीति पश्यः सर्व्वज्ञतया सकलं जगद्विजानाति स पश्यः । पश्य एव निर्भ्रमतयातिसूक्ष्ममपि वस्तु यथार्थं जानात्येवातः पश्यक इति । आद्यन्ताक्षरविपर्य्ययासिद्धेः सिंहः कृतेस्तर्कुरित्यादिवत् कश्यप इति हयवरट् इत्येतस्योपरि महाभाष्यप्रमाणेन पदं सिध्यति" ॥ इति दयानन्दकृतायां वेदभाष्योपक्रमणिकायां २९१ सङ्ख्यकपत्रे ॥ कश्यं अज्ञानं अविद्यामित्यर्थः । तत्पिबति शोषयति नाशयति । यद्वा कश्यं विज्ञानघनम् पाति रक्षति स्वात्मनीति । परब्रह्म । तथा च तापनिश्रुतिः २ । ११ ॥
"सा होवाच गान्धर्व्वी गर्भिं वै दुर्व्वाससं कोऽयं ब्रह्मन् ! वा एतस्य प्रजालोकस्य पालयिता भर्त्ता वा जगतः । सहोवाच तत्त्ववित् प्रवरो महान् दुर्व्वासाः । तदेव ब्रह्म वा आत्मा एतस्य पाता हर्त्ता प्रजानां गोप्ता वावह कश्यपो ह योऽयमन्नानभोक्ता गान्धर्व्वि" ॥
कच्छपः । तथा च शतपथब्राह्मणे—
"स यत्कूर्म्मो नाम । प्रजापतिः प्रजा असृजत यदसृजताकरोत्तद्यदकरोत्तस्मात् कूर्म्मः कश्यपो वै कूर्म्मस्तस्मादाहुः सर्व्वाः प्रजाः काश्यप्यः" ॥
यथा यजुर्व्वेदे २४ । २७ ।
"अपामुद्गो मासां कश्यपः" । "कश्यपः कच्छपः" । इति वेददीधितिः ॥ कश्यं मद्यं पिबतीति । कश्य + पा + क । "सुरापः श्यावदन्तः स्यात्" । इति वचनात्तथात्वम् । श्यावदन्ते त्रि, यथा, कात्यायनश्रौतसूत्रे १० । २ । ३५ ।
"प्रकृतेभ्योऽन्यत् कण्वकश्यपयाचमानवर्ज्जम्" ॥)
मृगविशेषः । इति मेदिनी ॥ मत्स्यभेदः । इति विश्वः ॥

कश्यपनन्दनः, पुं, (कश्यपस्य नन्दनः ।) गरुड़ः । इति हलायुधः ॥ (देवासुरादयोऽपि ।)

कष वधे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) कषति । अयमुभयपदीति चतुर्भुजमुकुटौ ॥ रमानाथरामौ तु इमं परस्मैपदिनं मत्वा उभयपदिनं तावत्यान्तं अन्यं मन्येते । इति दुर्गादासः ॥

कषः, पुं, (कषत्यत्र अनेन वा । कष् + अच् ।) कषपट्टिका । कष्टिपाथर इति भाषा । तत्पर्य्यायः । शाणः २ निकषः ३ । इत्यमरः । २ । १० । ३२ ॥

कषणः, त्रि, (कष्यते. विखाद्यते । कष् + कर्म्मणि ल्युट् ।) अपक्कः । इति शब्दचन्द्रिका ॥ (पुं, कषत्यत्र । अधिकरणे ल्युट् । निकषोपलम् । यथा, आर्य्यासप्तशती ४१८ ।
"भूषयतां भजतः सखि ! कषणविशुद्धस्य जातरूपस्य" ॥ भावे ल्युट् । क्ली, कण्डूयनम् । यथा किराते ५ । ४७ ।
"कषणकम्पनिरस्तमहाहिभिः
क्षणविमत्तमतङ्गजवर्जितैः" ॥
"हृष्टाद्रौ कषणेन कण्डूयनेन यः कम्पस्तेन निरस्ता महाहयो येभ्यस्तैः" ॥ इति तट्टीकायां मल्लिनाथः ॥)

कषा, स्त्री, (कष्यते ताड्यते अनया । कष् + बाहुलकात् करणे अप् । ततष्टाप् ।) कशा । इत्यमरटीकायां रमानाथः ॥ चावुक् इति भाषा ॥ (यथा रामायणे ६ । २७ । ४१ ।